## दीर्घ इणः किति । (६९/२४५६)

इणो[1]ऽङ्गस्य योऽभ्यासः तस्य दीर्घो भवति किति लिटि परतः । ईयतुः, ईयुः । 'इणो यण्' (६. ४. ८१/२४५५) इति यणादेशे कृते स्थानिवद्भावाद् द्विर्वचनम् । किति इति किम् ? इयाय । इययिथ ॥

## अत आदेः । (७०/२२४८)

अभ्यासस्य आदेः अकारस्य दीर्घो भवति लिटि परतः । [2]अतो गुणे (६. १. ९७/१९१) पररूपत्वस्यापवादः । आट, आटतुः, आटुः । आदेः इति किम् ? पपाच । पपाठ ॥

## तस्मान्नुड् द्विहलः । (७१/२२८८)

तस्मादतोऽभ्यासाद् दीर्घीभूतादुत्तरस्य द्विहलो[3]ऽङ्गस्य नुडागमो भवति[4] । आनङ्ग, आनङ्गतुः, आनङ्गुः । आनञ्ज, आनञ्जतुः, आनञ्जुः । द्विहलः इति किम् ? आट, आटतुः, आटुः । ऋकारैकदेशो रेफो हल्ग्रहणेन गृह्यते, तेनेहापि द्विहलोऽङ्गस्य नुडागमो भवति, आनृधतुः, आनृधुः ॥

## अश्नोतेश्च । (७२/२५३३)

[5]अश्नोतेश्च दीर्घीभूतादभ्यासादुत्तरस्य नुडागमो भवति[6] । व्यानशे, व्यानशाते, व्यानशिरे । अश्नोतेः इति विकरणनिर्देशः अश्नातेर्मा भूत् इति । आश, आशतुः, आशुः ॥

## भवतेरः । (७३/२१८१)

भवतेरभ्यासस्य अकारादेशो भवति [7]लिटि परतः । बभूव, बभूवतुः, बभूवुः । [8]भवतेः इति कृतविकरण–निर्देशादिह न भवति, अनुबभूवे कम्बलो देवदत्तेन । [9]लिटि इत्येव, बुभूषति । बोभूयते ॥

## ससूवेति निगमे । (७४/३५१७)

ससूव इति[10] निपात्यते । सूतेर्लिटि परस्मैपदं वुगागमः अभ्यासस्य च अत्वं निपात्यते । [11]ससूव स्थविरं (ऋ. ४. १८. १०) विपश्चिताम् । [12]सुषुवे इति भाषायाम् ॥

---

1. अङ्गस्य नास्ति क. ब. इ, इणोऽभ्यासस्य ब. ह. 2. वाक्यमिदं नास्ति ब. 3. अङ्गस्य नास्ति क. 4. लिटि परतः इत्यधिकम् ड. 5. अश्नोतेश्च नास्ति ह, अद्विहलार्थ आरम्भः इत्यधिकम् इ. 6. लिटि परतः इत्यधिकम् ह. 7. लिटि परतः नास्ति ब. 8–9. वाक्यमिदं नास्ति ब. 10. निगमे इत्यधिकम् ब.क, निगमविषये इत्यधिकम् इ. 11. गृष्टिः ससूव स्थविरं तवागाम् ऋ. 4. 18. 10. 12. निगमे इति किम् सुषुवे गर्भम् ब..